# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-१ ( Sem_2 )** **प्रश्नपत्र-७** **गुणाः - ७०**

**विषयः - पुराणेतिहासः** CE 1.2.3 **समयः - ११:०० तः ०२:००**

**दिनाङ्कः - २५-०४-२०१६** **सन्दर्भग्रन्थः - श्रीमद्भागवतमहापुराणे तृतीयस्कन्धः**

---

### युनिट-१

**प्रश्नः -१ अधस्तनेषु कयोरपि द्वयोः श्लोकयोः ससन्दर्भ प्रसङ्गं संस्कृते भावार्थो लेख्यः । ०८**

*(१) अहो बलीयं स्तनकालकूटं जिघांसयाऽपाययदप्यसाध्वी ।*
*लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम ॥*

*(२) सुखाय कर्माणि करोति लोको न तैः सुखं वाऽन्यदुपारतं वा ।*
*विन्देत भूयस्तत एव दुःखं यदत्र युक्तं भगवान् वदेन्नः ॥*

*(३) अनुव्रतानां शिष्याणां पुत्राणां च द्विजोत्तम ।*
*अनापृष्टमपि ब्रूयुर्गुरवो दीनवत्सलाः ॥*

**प्रश्नः -२ उद्धवेन कृता भगवल्लीलानां वर्णनं कुरुत । ०८**

**अथवा**

**मैत्रेयेण कृतं सृष्टिवर्णनं कुरुत ।**

**प्रश्नः -३ द्वयोः टिप्पणी कार्या । ०४**

*(१) विदुरोद्धवयोः समागमः ।* *(२) ब्रह्मोत्पत्तिः ।*

*(३) वीराट्शरीरोत्पत्तिः ।* *(४) कालविभाजनम् ।*

**प्रश्नः -४ अधोलिखितेषु पञ्चानामुत्तरं लिखत । ०५**

*(१) तृतीयस्कन्धस्य नाम किम् ?*

*(२) भागवते कति स्कन्धाः ?*

*(३) भागवते कति श्लोकाः ?*

*(४) कपिलः अंशावतारः कलावतारो वा ?*

*(५) कपिलः कस्य शास्त्रस्य प्रवर्तकः ?*

*(६) भगवतः अवताराः कति ?*

### युनिट-२

**प्रश्नः -५ अधस्तनेषु कयोरपि द्वयोः श्लोकयोः ससन्दर्भ प्रसङ्गं संस्कृते भावार्थो लेख्यः । ०८**

*(१) तपसैव परं ज्योतिर्भगवन्तमधोक्षजम् ।*
*सर्वभूतगुहावासमञ्जसा विन्दते पुमान् ॥*

*(२) तेजीमसामपि ह्येतन्न सुश्लोक्यं जगद्गुरो ।*
*यद्वृत्तमनुतिष्ठन् वै लोकः क्षेमाय कल्पते ॥*

*(३) यत्प्रसादादिदं विश्वं प्रसीदति यदात्मकम् ।*
*स स्वदृग्भगवान् यस्य तोष्यतेऽनन्यया दृशा ॥*

**प्रश्नः -६** **जय-विजयाभ्यां प्रदत्तः सनत्कुमारैः शापः ।** **०८**

**अथवा**

**हिरण्याक्षवराहयोः युद्धम् ।**

**प्रश्नः -७** **एकां टिप्पणीं लिखत ।** **०२**

*(१) वराहावतारकथा ।* *(२) 'कर्दम' ऋषेः तपस्या वरप्राप्तिश्च ।*

**प्रश्नः -८** **द्वयोः लघूत्तरे लिखत ।** **०२**

*(१) हिरण्यकशिपोः पत्न्याः नाम किम् ?*

*(२) जय-विजयौ कुत्र द्वारपालपदे आस्ताम् ?*

*(३) सनत्कुमाराणां सङ्ख्या का ?*

*(४) हिरण्याक्षशब्दस्य कोऽर्थः ?*

**युनिट-३**

**प्रश्नः -९** **अधस्तनेषु कयोरपि द्वयोः श्लोकयोः ससन्दर्भ प्रसङ्गं संस्कृते विलिख्य भावार्थो लेख्यः ।** **०८**

*(१) सङ्गो यः संसृतेर्हेतुरसत्सु विहितोऽधिया ।*
*स एव साधुषु कृतो निःसङ्गत्वाय कल्पते ॥*

*(२) तितिक्षवः कारूणिकाः सुहृदः सर्वदेहिनाम् ।*
*अजातशत्रवः शान्ताः साधवः साधुभूषणाः ॥*

*(३) ज्ञानवैराग्ययुक्तेन भक्तिभोगेन योगिनः ।*
*क्षेमाय पादमूलं ते प्रविशन्त्यकुतोभयम् ॥*

**प्रश्नः -१०** **श्रीकपिलजन्मकथां वर्णयत ।** **०८**

**अथवा**

**साङ्ख्येशास्त्रोपदेशं वर्णयत ।**

**प्रश्नः -११** **टिप्पणीद्वयं लिखत ।** **०४**

*(१) श्रीकपिलेन मात्रे दत्तोपदेशः* *(२) मानवस्य जीवगतिवर्णनम् ।*

*(३) गृहासक्तस्य अधोगतिवर्णनम् ।* *(४) भक्तियोगस्य उत्कृष्टता ।*

**प्रश्नः -१२** **पञ्चानां लघूत्तराणि लिखत ।** **०५**

*(१) यमाः कति के च ते ?*

*(२) प्राणायामस्य के त्रयः प्रकाराः ?*

*(३) अपरिग्रहशब्दस्य कोऽर्थः ?*

*(४) देवहूत्याः पित्रोः नाम किम् ?*

*(५) कपिलस्य कति भगिन्यः काश्च ताः ?*

*(६) कर्दमस्य विमानं केन नाम्ना प्रसिद्धम् ?*

*(७) कपिलः कस्य दर्शनस्य प्रवर्तकः ?*

--------------------